National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 123-125
© 2026 NJHSR
www.sanskritarticle.com

**संघमित्रा जेना**
राष्ट्रियसंस्कृतविश्वविद्यालय,
तिरुपतिः

**Correspondence:**
**संघमित्रा जेना**
राष्ट्रियसंस्कृतविश्वविद्यालय,
तिरुपतिः

# गीतशङ्कर-गीतसुन्दरकाव्ययोः वसन्तवर्णनम् ।

**संघमित्रा जेना**

काव्यनिर्माणे कवेः भूमिका महत्त्वपूर्णा भवति। कवेः मुख्यं कर्म काव्यम् एव भवति। वस्तुतः कविः न केवलं शब्दाकारः, अपि तु तत्त्वद्रष्टा भवति। कवेः तत्त्वदर्शनं, भावग्रहणं पुनः तस्य भावस्य सुमधुरं स्फुटप्रकाशनं काव्यनिर्माणे प्रमुखं कारणमस्ति, येन कविः सुमनोहरं काव्यं कविता च विरच्य कविपदं सिद्ध्यति। यथा प्रोक्तमस्ति-

**नानृषिः कविरित्युक्त ऋषिश्च किल दर्शनात्।**
**स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।।**
**विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्। ।**
**दर्शनाद् वर्णनाच्चाथ लोके रूढा कविश्रुतिः।**
**नोदिता कविता तावद् यावज्जाता न वर्णना।।** [1]

**काव्ययोः परिचयः-**

श्रीचन्द्रशेखरेन्द्रसरस्वतीस्वामिना विरचितं 'गीतशङ्करम्' एकं सुप्रसिद्धं गीतिकाव्यमस्ति। अस्मिन् काव्ये शिवस्य पार्वत्याश्च शृङ्गारमयी दिव्यलीला सुन्दरतया वर्णिता अस्ति। काव्येऽस्मिन् द्वादशसर्गाः, विंशत्यष्टापद्यः सन्ति। एवमेव श्रीसदाशिवदीक्षितेन विरचितं सुप्रसिद्धं गीतिकाव्यमस्ति गीतसुन्दर-म्।अस्य काव्यस्य मुख्यविषयः भगवान् सुन्दरेश्वरस्य तथा माता मीनाक्ष्याः लीलात्मककथानां प्रस्तुतीकरणम्। काव्येऽस्मिन् षट्सर्गाः, चतुर्विंशतिः अष्टपद्यः विद्यन्ते। प्रत्येकस्या अष्टपद्याम् अष्टः श्लोकाः सन्ति, येन काव्यस्य गेयत्वं माधुर्यं च अत्यन्तमभिवर्धते।

**गीतशङ्करस्य संक्षिप्तकथावस्तुः -**

पौराणिककथानुसारम् एकदा पार्वती कौतुहलवशात् शिवस्य नेत्रे आच्छादितवती। तस्मात्क्षणैव समग्रे संसारे अन्धकारः जातः, तदर्थं शिवः पार्वतीं भूमौ गन्तुमादेशं दत्तवान्।आदौ सा देवी काश्यां, अनन्तरं च काञ्चीपुरं गत्वा घोरं तपः चकार। तत्र सा एकस्य आम्रवृक्षस्य समीपे सिकतालिङ्गं निर्माय तपस्यां कृतवती। शिवः पार्वत्याः परीक्षार्थं गङ्गानदीं अधः प्रेषितवान्। यदा सा गङ्गानदी सिकतालिङ्गं नाशयितुमुद्यताः अभवत्, तदा पार्वती शरीरेण सिकतालिङ्गम् आलिङ्गितवती। पार्वत्याः सिकता-लिङ्गं प्रति एतादृशी प्रेमभावं दृष्ट्वा शिवः अत्यन्तं प्रीतः अभवत्। सः तत्रैव आम्रवृक्षस्याधः आर्विभूय एकाम्रनाथः इति नाम्न विख्यातः अभवत्। देवी तत्र कामाक्षी नाम्ना सर्वप्रसिद्धा अभवत्। एतदेव गीतशङ्करस्य संक्षिप्तकथावस्तु भवति।

**गीतासुन्दरस्य संक्षिप्तकथावस्तुः-**

पौराणिककथानुसारं पाण्ड्यराजः मलयध्वजः अपुत्रिकः सन् पुत्रकामेष्टियागं कृतवान्। यागफलस्व-रूपेण देवी पार्वती स्वयमेव तस्य मलयध्वराजस्य कन्यारूपेणवतीर्णा, यस्या नाम तटातका इति

प्रसिद्धा। मीनसदृशनेत्रत्वात् सा मीनाक्षी इति सर्वविख्याता। पश्चात् सा युवराजपदत्वं लब्ध्वा पाण्ड्यराज्यस्य शासनभारं स्वीकृतवती। त्रिलोचना, त्रिस्तनी, चतुर्बाहुयुक्ता मीनाक्षी सर्वत्र दिग्विजयार्थं गतवती। जन्मकाले तस्याः बक्षत्रयं आसीत् । तस्मिन् समये पण्डितैः भविष्यवाणी कृता-"यं दृष्ट्वा तस्याः तृतीयवक्षः अदृश्या भविष्यति सः एव तस्याः नायकः इति । मीनाक्षी चतुदर्शभुवनानां जयं कृत्वा शिवमपि जयं करिष्यामिति चिन्तितवती। अतः सा कैलासं प्रति गतवती। तत्र गत्वा शिवस्य दर्शनेन तस्याः तृतीयवक्षः, तृतीयनेत्र, बाहुद्वय च अदृश्यं जातम्। अनन्तरं शिवेन सह तस्याः मीनाक्ष्याः विवाहः जातः । शिवः तत्र सुन्दरपाण्ड्यराजरूपेण शासनभारं गृहीतवान्। तत्पश्चात् तयोः पुत्रयोः एव पाण्ड्यराजरूपेण राज्यशासनभारग्रहणं कृतवान् । अनयोः पाण्ड्यपरम्परा आगता इत्यस्य मुख्यकथावस्तु अस्ति ।

**वसन्तर्तुः -**

प्रमुखतः वसन्तर्तुः षड्तूनां मध्ये अतीव मनोहरः ऋतुः इत्यभिधीयेते। अस्यागमनं शिशिरर्तोः अनन्तरं ग्रीष्मर्तोः पूर्वं भवति। अस्मिन् काले वृक्षेषु नवानि पत्राणि पुष्पाणि च विकसन्ति।आम्रवृक्षेषु चुताङ्कुराः जायन्ते, येषां सुगन्धः सर्वः दिशः व्याप्ताः भवन्ति। पुष्पैः वनानि उद्यानानि च विविधवर्णैः अलङ्कृतानि जायन्ते। अस्मिन्काले कोकिलाः सुमधुरं कूजनं कुर्वन्ति, अपि च पुष्पेषु भ्रमराः गुञ्जन्ति। मन्दं मन्दं शीतलः वायुः वहति, यः सर्वेषां जनानां हृदयं आह्लादयति। अयं ऋतुः शृङ्गाररसस्य उद्दीपनं भवति। अस्मिन्काले मन्मथस्य प्रभावाधिकः भवति। वसन्तर्तुः प्रकृतिसौन्दर्यस्य आह्लादस्य, उत्साहस्य च प्रतीकः भवति। अयं ऋतुः जनानां जीवनं नूतनचैतन्येन परिपूरयति। अतः कवयः वसन्तं प्रेमस्य सौन्दर्यस्य च प्रतीकरूपेण वर्णयन्ति।

**गीतशङ्करे वसन्तवर्णनम्-**

काव्येऽस्मिन् वसन्ततौं प्रकृत्याः सुमधुरं वर्णनं, शिव-पार्वत्योः दिव्यप्रेमवर्णनेन सह कृतमस्ति। वसन्तकाले आगमने सुगन्धितः समीरः प्रवहति। आम्रवृक्षस्य अधः भागे माधवीमण्डपे देवी पार्वती शिवचरित्रामृतं गायति ,स्वयं शिवं पश्यति। यथा कवेः उक्तिः-

**प्रगल्भतरभामिनी शिवचरित्र गानामृत-**
**प्रभूतनवमञ्जरीसुरभिगन्धिमन्दानिले।**
**रसालतरुमूलगस्फुरितमाधवीमण्डपे**
**महेशमुपदर्शयन्त्यसकृदाह गौरीमसौ।।**[2]

अत्र भगवान् चन्द्रशिखामणिः (शिवः) मल्लिकापुष्पैः अलङ्कृतायां शय्यायां शयानः मन्मथस्य तापं शमयितुं हृदये सदा पार्वतीं स्मरति। वसन्तकालिकः अयं मृदुमलयसमीरः तस्य हृदये प्रेमाग्निं अधिकतया प्रज्वालयति, यथा श्लोके-

**मदनकदनशान्त्यै फुल्लमल्लीप्रसूनैः**
**विरचितवरशय्यामाप्लुवन्निन्दुमौलिः।**
**मृदुमलयसमीरं मन्यमानः स्फुलिङ्गान्**
**कलयति हृदये त्वामन्वहं शैलकन्ये।।** [3]

**गीतेसुन्दरे वसन्तवर्णनम्-**

वसन्तर्तोरागमने तस्य सुमधुरसुगन्धः सर्वत्र दिशि आरभते । आम्रवृक्षेषु नवानि चूताङ्कुराणि जायन्ते। तदा अरण्येषु कोकिलाः आम्रवृक्षस्य प्रथमचुताङ्कुरं चर्वयित्वा स्वगर्वेण कोलाहलं कुर्वन्ति । एवं सर्वे तटातकाया रागालापं कुर्वन्ति । तद्यथा-

**चूताङ्कुर-प्रथम चर्वण-गर्वितानां**
**कोलाहलैर्-मुखरिता वनकोकिलानाम् ।**
**उद्दीपनेन मदनस्य तटातकयां**
**वासन्तिकाः सरससौरभं आरभन्ते ॥**[4]

मन्दः वायुः स्वतरङ्गेण वेगवतीनद्या तरङ्गेषु डोलमानानां कमलपुष्पाणाम् अतीव शीतलगन्धं समानितः वहति । पुनश्च वञ्जुलपुष्पसमूहः स्वशिखरेण मृदुगत्वा कामदेवस्य अपारशक्तिं प्रशंसति इति आभासते। येन वसन्तस्य महत्वं द्योतयाति । यथा-

**एते वेगवती-तरङ्ग-तरल-प्रत्यग्र-पाथोरुहा-**
**नीतैः शीतल-सौरभैर् विरहिणो भिन्दन्ति मन्दानिलाः ।**
**एषा वञ्जुल-मञ्जरी च शिरसा यद्विक्रमं श्लाघते**
**सोऽयं सून-शरासनो विजयते रन्ता वसन्तश्रियाम् ॥**[5]

वसन्तागमनकाले अर्धचन्द्रधारी सुन्दरेश्वरः अत्यन्तं सुमनोहरं दृश्यते। यस्य दर्शनेन अप्सरसुं, ऋषीणामपि च मनांसि विचलिताः भवन्ति। सः नेतर्कोणैः मनोहरदृष्टिभिः सर्वान् मोहयति। मधुरः वार्तालापः, क्रीडासु कम्पमानः रत्नसंयुक्ताः कर्णकुण्डलाः, कामुकस्पन्दनयुक्तानि च ओष्ठानि शोभन्ते। मन्मथस्य पञ्चपुष्पवाणैः विद्धाः यात्रिकाः व्यथिताः भवन्ति । मधुमक्षिकाः, शुकाः च सुमधुरध्वनिना गुञ्जनं कुर्वन्तिः। श्रीखण्डाचलात् वहन् शीतलः वायुः मन्दं मन्दं गीतमिव गायति,कुहु कुहु कण्ठस्वराश्च सर्वत्र श्रूयन्ते । यथा कविभिः वर्णितम्-

**अद्योदञ्चित-पञ्चबाण- विशिख-प्रख्यात-पान्थ व्यथा-**
**संनद्ध-प्रतिबुद्ध -षट्पद-शुकी-पारावत -प्रस्तुताः।**
**श्रीखण्डाचल-शीतलानिल-चलन्माकन्द-शाखाशिखा-**
**मन्दान्दोलित-नीड-निर्भर-कुहू-कण्ठस्वरा वासराः ॥**[6]

**उपसंहारः-**

एवं गीतशङ्कर-गीतसुन्दरगीतिकाव्ययोः वसन्तवर्णनम् अत्यन्तं रमणीयं, हृदयहारि, उत्कृष्टपूर्णं च दृश्यते। अत्र प्रकृतिप्रकृत्या वर्णनं, भक्तिभावः, शृङ्गारः च समरसतया संयोजिताः सन्ति, येन काव्यस्य साहित्यकं धार्मिकं च महत्त्वाधिकं वर्धते।

**संकेताक्षरसूची-**

1-सं.का.अ.प- संस्कृत काव्यशास्त्र की अर्वाचीन परम्परा

2-गी.श- गीतशङ्करम्

3-गी.सु- गीतसुन्दरम्

**सहायकग्रन्थसूची-**

1.गीतशङ्करम्-आचार्यश्रीचन्द्रशेखरेन्द्रसरस्वती(६२तम),Translated by P.R KANNAN, January 19,2019

2.गीतसुन्दरम्- श्रीसदाशिवदीक्षितः, Translated by P.R KANNAN, Mumbai, july 14.2014

3-संस्कृत काव्यशास्त्र की अर्वाचीन परम्परा- राजमङ्गल यादव, प्रकाशकः डॉ राधेश्यामशुक्लः, प्रतिभा प्रकाशन,शक्तिनगर, दिल्ली-११०००७, प्रथम संस्करणम्-२०११

**संदर्भ**

1. सं. का. अ.प- पृ. ३०३
2. गी. शं- स.२,श्लो.११
3. शं-स.२,श्लो.१२
4. गी. सु- स. १,श्लो.११
5. गी. सु- स.१,श्लो.१०
6. गी. सु- स.१,श्लो.९